Shri Raghunath Temple MSS. Library,
JAMMU

No. ४३८६

Title साँख्य चान्द्रिका.

Author श्रीनारायण तीर्थः

Extent ६ Age १

Subject साँख्य शास्त्रं

© Dharmartha Trust J&K. Digitized by eGangotri

सांख्यचन्द्रिका

५३७६

© Dharmartha Trust J&K. Digitized by eGangotri

४३७६

सांख्यचंद्रिका

६००

© Dharmartha Trust J&K. Digitized by eGangotri

श्रीगणेशाय नमः॥ श्रीरामो जयति। दुःखत्रयाभिघाताज्जिज्ञासा तदपघातके हेतौ इत्यादि ... सांख्यकारिकाणां व्याख्यानं ... ग्रन्थस्य आदौ ... ईश्वरकृष्णः ... पुरुषार्थं ... शास्त्रप्रयोजनं ... संबन्धं च ...
यत्नः सोऽयं मूलेन तु ते संख्या चेदित्यादिना ... दुःखहेयं हेतुः ... साधनं ... मुमुक्षुजिज्ञासायां ... हेयं सर्वं ... इतीयत् दुःखं हेयं हेतुः प्रकृतिपु
रुषयोः संयोगः ... दुःखस्यात्यन्तनिवृत्तिः परमपुरुषार्थः॥ [redacted] हेतुः ... पुरुषार्थः शास्त्रं ... परमपुरुषार्थसाधनं ... तदुपाय ... इत्यादि
दुःखत्रयं ... जिज्ञासा भवतीत्याह। दुःखत्रयेत्यादि। दुःखत्रयं आध्यात्मिकं आधिभौतिकं आधिदैविकं ... आध्यात्मिकं द्विविधं शारीरं मानसं च ... तत्र शारीरं ... आध्यात्मिकं ... धातुवैषम्य ...
दुःखं ... आधिभौतिकं ... आधिदैविकं यक्षराक्षसविनायकग्रहाद्यावेशनिमित्तं ... सर्वं ... दुःखं ... तत्प्रतिकूलवेदनीयं ... अनुभूयते ... तेषां दुःखत्रयाणां अभिघातः ... दुःखेन ... संयोगः ... तस्य ... अभिघात
तदपघातके हेतौ ... जिज्ञासा ... दुःखस्य ... दृष्टे सापार्था ... आयुर्वेदशास्त्रोक्तैः ... उपायैः ... ओषधादिभिः ... अपार्था ... मानसस्य ... इष्टविषयप्राप्त्या ... आधिभौतिकस्य नीतिशास्त्राभ्यासेन ... आधिदैविकस्य मणिमन्त्रौषधादिना ... निवृत्तिः ... एकान्तात्यन्ततोऽभावात् ...
... अवश्यंभावः ... अत्यन्तः ... पुनरुत्पत्त्यभावः ... एकान्तात्यन्ताभ्यां ... दृष्टोपायात् ... दुःखनिवृत्तेरभावात् ... जिज्ञासा सार्था ...
श्रीगणेशाय नमः॥ दुःखत्रयाभिघाताज्जिज्ञासा तदपघातके हेतौ। दृष्टे सापार्था चेन्नैकान्तात्यन्ततोऽभावात्॥१॥ दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्तः। तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात्॥२॥

पा॰ अन्यथासिद्धा निवृत्तिरित्यर्थः॥ निषेधति नेति एकान्तत्वं दुःखोच्छेदस्यावश्यकत्वं अत्यन्तत्वं उच्छिन्नस्य पुनरनुत्पादः तदुभयस्य दृष्टोपायादभावात्॥ ननु स्वर्गस्य दुःखानभिन्नत्वात् तत्साधनत्वेन ज्योतिष्टोमादिकर्मण एव जिज्ञासाविषयतेति
चाह दृष्टवदिति गुरुमुखादनुश्रूयत इत्यनुश्रवो वेदः कर्मकाण्डरूपस्तेन बोधितो ज्योतिष्टोमादिरानुश्रविकः उपायो दृष्टवत् ओषधादिवत् अत्र हेतुमाह सहीति हि यतः अविशुद्धिः अंगवैगुण्ये न हिंसादि तिरूपत्वनिषिद्धहिंसाया अन्ततो यस्य पश्वा
दि क्षेत्रानां अभिसाधनत्वात् ... अतो दुःखहेतुरेव क्षयेति तत्कर्मणः क्षयित्वेन नाशेन दुःखोच्छेदकत्वं क्षयानन्तरं दुःखप्राप्तिरित्यर्थः अतिशयेति तत्रापि अधिकसुखिदर्शनात् ईर्ष्यामर्षाभ्यां स्वी
यदुःखोत्कर्ष एवातिशय इत्यर्थः ननु विधिसंस्पृष्टस्य निषेधाविषयतया विरुद्धत्वात् अन्यथा विधिनिषेधाधीनप्रवृत्तिनिवृत्तिसमावेशदोषप्रसंगात् अहवनीयविधिः पदे होमं विदधन् हिंसा
दित्यादिनिषेधोऽपि अग्नीषोमीयं पशुमालभेतेत्यादिविधिविषययागीयहिंसां परिहृत्य प्रवर्तत इति यागीयातिरिक्तहिंसैव पापं न यागीयेति चेत् न हिंसायां विध्यधीनेष्टसाधनत्वस्य निषेधाधीनप्रवृत्तिनिवृत्तिसमावेशासंभवा
त् पशुवधप्रयुक्तस्याल्पानिष्टस्य विजव्यायामादिसाध्यदुःखस्येवाभ्युपगमेन क्रतुसाध्यमहाफलार्थितया प्रवृत्तेरुपपन्नत्वेन विधिनिषेधाधीनप्रवृत्तिनिवृत्तिसमावेशदोषाणामनवकाशात् पापमेव हिंसाधातुप्रदर्शं स्यात् यागीयापि
हिंसेति नहि तिरज्योतिष्टोमादिकमविशुद्धमेवात एवोक्तं भारते पितापुत्रसंवादे तातैतद्बहुशोऽभ्यस्तं जन्मजन्मान्तरेष्वपि त्रयीधर्ममधर्माढ्यं न सम्यक् प्रतिभाति मे इति अधिकमस्मत्कृतयोगसूत्रव्याख्याने ऽनुसंधेयं न द्विपरीतः श्रे
यान् दृष्टानुश्रविकाद्विलक्षण उपायः शास्त्रोक्तात्मसाक्षात्कारः श्रेयान् ऐकान्तिकात्यन्तिकदुःखोच्छेदसमर्थः सकस्माद्भवति तत्राह व्यक्तेत्यादि व्यक्तं भूतादि अव्यक्तं प्रधानं ज्ञः पुरुषः एषां विविच्य ज्ञानाद्भवतीत्यर्थः अयमभि
प्रायः आत्मानात्मविवेकसाक्षात्कारात् कर्तृत्वाद्यखिलाभिमाननिवृत्त्या तत्कारणरागद्वेषधर्माधर्माद्यनुत्पादात् पूर्वोत्पन्नकर्मणां वा विद्यारागादिसहकार्युच्छेदरूपदाहेन विपाकानारंभकत्वात् प्रारब्धसमाप्त्यनंतरं
पुनर्जन्माभावेन त्रिविधदुःखात्यन्तनिवृत्तिरूपो मोक्षो भवतीति तत्र हेतुसाक्षात्कारहेतौ मनननिदिध्यासनरूपे शास्त्रे प्रेक्षावतो जिज्ञासा भवत्येवेति ॥२॥ नित्यसाधनस्य ... १

© Dharmartha Trust J&K. Digitized by eGangotri

व्यक्ताव्यक्तज्ञानां स्वरूपं दर्शयितुं लक्षणमाह मूलप्रकृतिरिति मूलप्रकृतिः सर्वजनिका प्रकृतिरविकृतिरजन्या तथा चाजन्यत्वे सति जनकत्वं प्रकृतित्वं अव्यक्तमुक्त्वा व्यक्तं द्विविधमाह महदाद्याः महत्त्वाहंकारपंचतन्मात्राणि
प्रकृतिविकृतयः तत्त्वविभाजकोपाध्यवच्छिन्नजनकत्वे सति जन्यत्वमित्यर्थः षोडशकस्त्विति एकादशेंद्रियाणि पंचाकाशादीनि महाभूतानि च विकार इति तत्त्वविभाजकोपाध्यवच्छिन्नाजनकत्वे सति जन्यत्वमित्यर्थः पुरुष
स्तु सर्वभोक्ता न प्रकृतिर्न विकृतिः अजनकत्वे सत्यजन्यत्वमित्यर्थः आद्यविशेषणेन प्रकृतेर्निरासः द्वितीयेनातींद्रियसामान्यादिनिरासः तदेवं पंचविंशतितत्त्वान्युक्तानि सेश्वरसांख्यनये तु पुरुषपदे नैवेश्वरस्यापि ग्रहणं
मायापदेन चेश्वरसंकल्प एवोच्यते जीवादृष्टं वा अविद्याशब्देन च जीवस्य भ्रम एवोच्यते नान्यत् अतो न तत्त्वकथनकृतान्यूनतेति संक्षेपः उक्तान्युक्तानि तेषां सिद्धिः प्रमाणेन भवति न चैकप्रमाणेन सर्वेषां तत्त्वानां सिद्धिः
संभवति तथा च प्रमाणबहुत्वमुचितं तत्र कानि प्रमाणानि कियंति चेत्यत आह दृष्टमिति दृष्टं प्रत्यक्षं अनुमानमनुमितिकरणं लिंगपरामर्शः आप्तवचनं शब्दप्रमाणमुक्तं कपिलेन भगवता त्रयः कुतः सर्वप्रमाण
सिद्धत्वात् सर्वैः प्रमाणैः प्रमातृभिः पतंजलिप्रभृतिभिः सिद्धत्वात् प्रत्यक्षानुमानागमाः प्रमाणानीति स्वीकृतत्वात् उपमानादिकं तु न सर्वप्रमाणसिद्धमिति भावः यद्यपि वैशेषिकैः शब्दो नाभ्युपेयते तथापि तेन
प्रमातार इति भावः एवमन्येपि प्रत्यक्षाद्यपरपंतो न प्रमातार इति बोध्यं उपमानस्यांतर्भावो यथा गवयपदं गवयवाचकं असति वृत्त्यंतरे तत्र प्रयुज्यमानत्वादिति एवमर्थापत्तेरपि यथा पीनो देवदत्तो दि
प्रत्यक्ष ८ वा न भुंक्ते इत्यत्रायं रात्रिभोजी दिवा अभुंजानत्वे सति पीनत्वादिति अनुपलब्धिस्तु सहकारिणी न स्वतो भिन्नं रेहेति ह्यसंभवाद्यपि शब्द एव चेष्टा त्वनुमान एवेति संक्षेपः प्रमेयेति हि यतः प्रमाणाद्धि प्रमेयाणां सिद्धि
रतः प्रमाणं त्रिविधमिष्टमित्यर्थः ४ प्रमाणानां लक्षणमाह प्रतिविषयेति प्रतिविषयो नियतविषयो ध्यवसीयते निश्चीयते तेनेति प्रतिविषयाध्यवसायः इंद्रियं चक्षुरादीनां रूपादिविषयकत्वनियमान्नियतविषयकत्वं

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः ॥३॥ दृष्टमनुमानमाप्तवचनं च सर्वप्रमाणसिद्धत्वात् त्रिविधं प्रमा
णमिष्टं प्रमेयसिद्धिः प्रमाणाद्धि ॥४॥ प्रतिविषयाध्यवसायो दृष्टं त्रिविधमनुमानमाख्यातं तल्लिंगलिंगिपूर्वकमाप्तश्रुतिराप्तवचनं तु ॥५॥

नुकारणेन मेघादिना कार्यस्य वृष्ट्यादेर्ज्ञानं कार्येण धूमादिना कारण

स्य वह्न्यादेर्ज्ञानं न प्रत्यक्षं तथा च तेनैव प्रमाणेनानुमानं न त्वनुमिनत्येन तत्राह त्रिविधमिति तथा चानुमान एव तयोः प्रवेशः तथा च गौतमसूत्रं अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववच्छेषवत्सामान्यतोदृष्टं चेति तत्पूर्वकं व्याप्त्यादिप्रत्यक्षपूर्वकं
पूर्ववत् कारणेन कार्यानुमानं शेषवत् कार्येण कारणानुमानं सामान्यतोदृष्टं कार्यकारणभिन्नलिंगकं यथा वायुरुपनीतचंपकभागो रूपादिमान् गंधादिति त्रितयसाधारणमनुमानलक्षणमाह तल्लिंगेति लसेसाध्यस्य लिंगं व्याप्यं
लिंगं यस्य विद्यते स लिंगी व्याप्यवान् पक्षः पूर्वं कारणं यस्य प्रत्यक्षस्य तत्र यातथा च साध्यव्याप्यविशिष्टपक्षप्रत्यक्षं यद्वा व्याप्यधर्मवानयं पर्वत इत्याद्याकारः परामर्शोनुमानमनुमितिकरणत्वादित्यर्थः शब्दलक्षणं
कां ५ वक्तुमाह आप्तवचनमिति आप्तवचनत् वचनं वेत्याप्तवचनं आकांक्षासत्तियोग्यतातात्पर्यवत्पदकदंबकं लक्ष्यनिर्देशाय आप्तश्रुतिरिति लक्षणं प्रकृतवाक्यार्थगोचरयथार्थज्ञानवानाप्तः श्रूयत इति श्रुतिर्वा
क्यं तथा चाप्तोक्तवाक्यत्वमिति लक्षणं प्राप्तभुक्त्वा तत्कादिपयार्थवोक्तृसेश्वरसांख्यमते ईश्वर एवाप्तः अन्यमते तु तन्न प्रमाणमिति संक्षेपः वस्तुतस्तु सन्मते इंद्रियादिकं न प्रमाणं किंतु इंद्रियादिजन्या वृत्ति
रेव तथाहि अविसंवादि ज्ञानमनधिगततत्त्वबोधो वा प्रमा तत्करणं तस्या अयोगव्यवच्छेदेन संबंधितदेव प्रमाणं सामान्यलक्षणं तत्रेंद्रियसंचारमार्गेण बाह्यवस्तुसंबंधाच्चित्तस्येंद्रियसन्निकृष्टार्थ
विशेषावधारणप्रधाना वृत्तिः प्रत्यक्षं यथा घटोयमित्यादि गृहीतव्याप्तिकेन हेतुना साध्यवति पक्षे ज्ञायमानेन साध्यविषया वृत्तिरनुमानं यथा पर्वतो वह्निमानित्यादि आप्तोक्तेन शब्देन श्रोतुस्त
त्तदर्थाकारा वृत्तिरागमः यथा स्वर्गकामो यजेतेति वाक्यात् स्वर्गकामनावतो यागः कार्य इति अत्र सूत्रं पौरुषेयबोधः प्रत्यंयेनाजानामीत्यादि व्यवहरंति जना इत्यास्तां विस्तरः कारिकायां तु प्रति
विषयोध्यवसीयते निश्चीयते विषयी क्रियते येनेति इंद्रियजवृत्तिरूपं ज्ञानं प्रत्यक्षं लिंगलिंगिपूर्वकं व्याप्तिज्ञानद्वारा हेतुपक्षजन्यं साध्यज्ञानमनुमानं आप्तश्रुतिः आप्तेन शब्देन शाब्दबोधवृ
ति ॥५॥

© Dharmartha Trust J&K. Digitized by eGangotri

इदानीं प्रमाणत्रयविषया नाह सामान्यतस्त्विति सामान्यत इति पंचम्यां तात्तसिः तथा चेन्द्रिययोग्यस्य सर्वस्यापेक्षितस्यानपेक्षितस्य च दृष्टात्प्रत्यक्षादेव सिद्धिः ... यथा ... नापि प्रत्यक्षादेव सिद्धिरिति
भावः अतीन्द्रियाणां प्रकृत्यादीनां सिद्धिरनुमानात् यथा महत्तत्त्वं सकारकं कार्यत्वात् घटवदिति कारणान्तरबाधात् प्रकृतिसिद्धिः न च पुरुष एव जनकोऽस्तु तस्यापरिणामित्वेनाजनकत्वात् तस्मादपि परोक्षे अतीन्द्रियं
यागस्वर्गसाधनत्वादि तत् आप्तागमात् शब्दप्रमाणादित्यर्थः ६ ननु प्रकृत्यादेः प्रत्यक्षमेव कथं न प्रवर्त्तत इत्याशंकायां प्रत्यक्षविघटकान् हेतूनाह अतिदूरादिति प्रत्यक्षं न प्रवर्त्तत इति शेषः अत्यन्तदूरगतः पक्षी न
दृश्यते इत्यत्र दोषात् दोषश्च क्वचित्क्वचिदेव अन्यथा स्वपादिमेऽप्यदर्शनं स्यादिति चक्षुर्गोलकगतः कर्पूरादिरिति सामीप्यान्न गृह्यते अन्धापतितपवसोन्यपः इन्द्रियगोलकं तस्य घातान्नाशात् मनसोऽनवस्था
नात् व्यासंगेन तदिन्द्रियसंयोगाभावात् सौक्ष्म्यादिन्द्रियायोग्यत्वात् व्यवधानात् कुड्याद्यन्तरितत्वात् अभिभवो बलवत्सजातीयसंबंधः यथा सौरालोकाभिभवाच्चन्द्रप्रभा न गृह्यते समानाभिहारः समगुणानां मिश्रणं यथा
माहिषादिदुग्धे पतितं गव्यदुग्धं न गृह्यते ७ नन्वेषामन्यतराधीनः प्रत्यक्षाभाव इति भवद्भिः पूर्वमतं तन्न युक्तं प्रकृत्यादीनामभावनिबंधन एव सन्यभिचारी स नाह सौक्ष्म्यादिति सौक्ष्म्यान्निरवयवद्रव्यत्वेनेन्द्रियायोग्यत्वात् ते
षां प्रकृत्यादीनामनुपलंभो न प्रकृत्याद्यभावात् कुतः कार्यतस्तदुपलब्धेः कार्येण तेषां सिद्धेः कार्यलिंगकतदनुमानस्याबाधितत्वादिति भावः किं कार्यं तत्राह महदादीति आदिपदात् अहंकारपंचतन्मात्राणि गजनादय
सू८ श्च तच्च सरूपं महत्तत्त्वादिकं तत्त्वविभाजकोपाधिवत्त्वेन जनकत्वाद्विरूपं गगनादि तादृशजनकत्वात् एतत्कथनं कार्याणां विवेकज्ञानाय सा नाना सारविवेकेनात्मतत्त्वज्ञानजिज्ञासा धर्माधर्मयोर्वैधर्म्यं अकारणकत्वेन तत्त्वज्ञानस्य
कैवल्योपयोगित्वादिस्ये स्फुटीभविष्यति च। ननु नार्किकनये सतोऽसज्जायते तेन यावच्च यावत्कार्यं न जातं तावत्कारणान्तस्य प्रमाणाभावेनासत्त्वापत्तिः तथा च कथं प्रकृतेरपि तस्य सतस्त्वात् कार्येणानुमानतः सत्त्वं वक्तुं शक्यते तत्राह अ
सदिति कार्यं कारणव्यापारात् प्रागपि सदेव न तु तदानीमसत् अत्र हेतुमाह उपादानग्रहणात् उपादानं समवायिकारणं तस्य कार्यार्थिना ग्रहणात् यथा दध्यर्थी क्षीरमुपादत्ते नान्यत् यदि चासत्कार्यं स्यात्तर्हि दध्यर्थी उदकमपि

सामान्यतस्तु दृष्टादतीन्द्रियाणां प्रतीतिरनुमानात्। तस्मादपि चासिद्धं परोक्षमाप्तागमात्सिद्धं ॥६॥ अतिदूरात्सामीप्यादिन्द्रियघातान्मनोऽनवस्थानात्। सौक्ष्म्याद्व्यवधानादभिभवात्समानाभिहाराच्च ॥७॥ सौक्ष्म्यात्तदनुपलब्धिर्नाभावात्कार्यतस्तदु[...]पलब्धेः। महदादि तच्च कार्यं प्रकृतिसरूपं विरूपं च ॥८॥ असदकरणादुपादानग्रहणात्सर्वसंभवाभावा

दानं कुर्यात् न च कुर्वते तस्मादुपादानग्रहणाच्च न्यायते कारणे कार्यमस्तीति हेत्वंतरमाह सर्वसंभवाभावात् लोके यद्यस्मिन्नसति तदेव तस्माज्जायते शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यं ॥९॥
यते इति वक्तुमशक्यं महदादिग्रहणघटादेर्दर्शनात् यदि चासत्कार्यं स्यात्तर्हि तत्सर्वत्र सर्वं संभवेत् असत्त्वाविशेषात् न च यत्र यस्य प्रागभावो लीन एव तत्र जायत इति वाच्यं तन्तुसादृश्यपटप्रागभावः कुत्र स्यात् न च वाच्यम्
तिवाच्यं प्रागभावस्य क्रियाविरहेण नैनावाग्रमनाविरहेण नत्तुवर्त्तित्वं न स्यात् न चाधिकरणेन तु रूपेण पटप्रागभावस्तन्तुरूपकारणेनाधिकरणाद्यादिप्रागभावरूपतापि स्यात् न च पटरूपकारणत्वं नियामकं अन्योन्याश्रयात् ... धर्मासंभवात् ... स्तो
रसंबंधात् निरूपकत्वाद्ग्रिनिरूपकत्वरूपत्वेन तद्धर्मानवस्थ्य कारणं कार्यसत्तायां नतु निरूपितकारणतामधे व नान्य चेति नियामकाभावादिसाधन्यभिचारः हेत्वंतरमाह शक्तस्य शक्यकरणादिति कार्याशक्तिमत्त्वमेवोपादानत्वं अन्यस्य दुर्वचत्वात् शक्ति
श्च कार्यस्यानागतावस्थैव अभिव्यक्तत्वेन स्थाः कार्यसंबद्धत्वोऽव्यवस्थासंबद्धत्वेन असता संबंधश्च शिवमा शक्यस्य शक्यकारणादपि सत्कार्यमित्यर्थः हेत्वंतरमाह कारणभावाच्चेति तद्यथा संबन्धात्मत्वात् ... कार्यकारणभेदश्च अवयवेन कार्यस्य कारणात्मकत्वा
दपि सत्कार्यं असतोऽविसदसत्त्वेन तदानुपपत्तेरित्यर्थः अपि च लोके यत्कालिकं कारणं तत्कालिकं कार्यमिति हष्टं यथा कोऽवधेयः कोऽयवाविभ्यो ... यदि चासत्कार्यं स्यात्तदा कोऽपि वीरणाद्युत्पत्तिः स्यान्न च दृश्यते तस्मात्कार्यस्य कारण
तत्कालीनं सत्कार्यमिति न च तर्हि कार्यं सापि सत्प्रसक्त्या सामग्रीवैयर्थ्यप्रसंगश्चेति वाच्यं सामग्र्या अभिव्यक्तत्वार्थत्वात् न चाभिव्यक्तेरपि जन्यत्वे सत्कार्यवादबाधः स्यादिति वाच्यं सतोऽभिव्यक्तस्यापि ... भिव्यक्तायामनवस्थापत्तिरिति वाच्यं अवृत्त
रोपयोगित्वात् कार्याभिव्यक्तेः सत्त्वात् कार्यनिष्ठसत्त्वगुणरूपतया नित्यत्वेऽपि तत्सामग्रीतः प्रकटत्वव्यवहारोपयोगित्वं अभिव्यंजकसामग्र्यास्तेजः कुन्तमणेरिव तमसः ... तेजकालमात्रात्सत्कार्यवादसाधाभावात् ... का
रणयोर्भेदेऽपि व्यवहारक्षमताकार्यतमनाभिव्यक्तस्य वनान्यथा तेन कोऽपि दोषः इत्यलं विस्तरेण ९ तत्र पूर्वसामान्यधर्मा महदादिकार्यं प्रकृतिविरूपं सरूपं चेत्युक्तं तदिदानीं विविक्तज्ञानाय ... हेतुमदिति बलवन्महदादि व्यक्तं तत्र योऽविभाति सम्बद्धे हेतुमद्
हेतुः कारणं यस्याविभावे ... अनित्यं कारणजतिविनाशाविर्भाव ... अव्यापि असर्वगतं विभुत्वे क्रियानस्यात् सक्रियं अवे ... क्रियावत्त्वं तु व्याद्यायोगे कर्मणां ... अनेकं प्रतिपुरुषं भेदात् ... न तत्र ... आश्रितं ...
न्योन्याभावसमानाधिकरणतत्त्वविभाजकोपाधिमत्त्वं यानि चैतं महदादिषु महदादिप्रभृतयोगिकान्यान्यासंज्ञनेन महत्तत्त्वादेर्महदाद्यनुमानादिकरणत्वात् ... तत्सुनियतिः कसन्योन्याभावस्य प्रकृतावभावात् ... पुरुषे सत्त्वेऽपि तत्र प्रकृतितत्त्वाभावात् पुरुषे व्याप्तिः कारण
बुद्धिगुणस्य सतीति विद्वाणामंश अपयाने कालसर्गभेदेन भिन्नत्वं अर्गवृक्षाधानतया भावबद्धि ... नान्यत्रातिव्याप्तिः आश्रितं ... प्रधाने ... पंचतन्मात्राणि एकादशेन्द्रियाणि तन्मात्रेषु एवं यथासंभवं ... लिंगं लिंगयति ज्ञापयतीति लिं
गं अनुमापकं भवति ... साक्षात्परम्परया वा ... परिणामकं भवति एतद्धर्म्य
© Dharmartha Trust J&K. Digitized by eGangotri
२

एवं व्यक्ताव्यक्तयोर्वैरूप्यमुक्त्वा सारूप्यमाह· त्रिगुणमिति· व्यक्तं महदादि· तथा प्रधानं प्रकृतिः त्रिगुणं सत्वरजस्तमांसि त्रयो गुणा यस्य तत्त्रिगुणं· तत्र प्रकृतेर्गुणत्रयसाम्यावस्थारूपत्वात्
महदादेश्च प्रकृतिकार्यत्वेन गुणसंबंधात् अविवेकि प्रकृत्यभिन्नं तत्र महदादेः प्रकृत्यभिन्नत्वं कार्यकारणयोरभेदात् प्रकृतेस्तु स्वत एव· विषयः ज्ञानभिन्नः· न तु योगाचारमतवज्ज्ञानाकारः त
था सत्येकस्य बहुभोज्यता न स्यात् ज्ञानस्य तत्तदीयस्य तत्तत्पुरुषमात्रवेद्यत्वात् सामान्यं गुणत्वेन तुल्यं अथवा भोज्यत्वेन सर्वपुरुषाणां पण्यस्त्रीवत्तुल्यं अचेतनं स्वप्रकाशाच्चेतनाद्भिन्नं अ
नवभासकत्वात् प्रसवधर्मि प्रसवो व्याविर्भावहेतुत्वं धर्मो यस्य तादृशं यस्माद्बुद्ध्यादिकमहंकारादिकं प्रसूते प्रधानं तु बुद्धिं प्रसूते· तदिदं सर्वं व्यक्ताव्यक्तयोः सारूप्यमुक्तं अधुना व्यक्ताव्यक्तयोः
पुरुषस्य च साधर्म्यं वैधर्म्यं चाह· तद्विपरीतस्तथा च पुमानिति ताभ्यां व्यक्ताव्यक्ताभ्यां विपरीतो विरुद्धो निर्गुणत्वात् विवेकित्वात् निःसामान्यत्वात् चेतनत्वात् अप्रसवधर्मित्वाच्च· तथा च अव्यक्तस्
रूपोऽप्यहेतुमत्त्वादिना एवं व्यक्तस्वरूपोऽप्यनेकत्वसंख्ययेति भावः ११ त्रिगुणमित्युक्तं तत्र किमात्मका गुणाः किमर्थाः किं प्रवृत्तयश्चेत्यत आह प्रीत्यप्रीतीति· गुणाः सत्वरजस्तमांसि यथा
संख्यं प्रीत्यादिरूपाः तत्र प्रीतिः सुखमुपलक्षणमार्जवमार्दवह्रीश्रद्धाक्षमानुकंपाज्ञानादीनां· अप्रीतिः दुःखमुपलक्षणं प्रद्वेषद्रोहमत्सरनिन्दानिरुत्साहादीनां· विषादो मोहः उपलक्षणं विप्र
लंभभयनास्तिक्यकौटिल्यकार्पण्याज्ञानादीनां· यच्चैतदुपलभ्यते तत्र तादृग्गुणः प्रत्येतव्य इति भावः· लक्षणमुक्त्वा प्रयोजनमाह· प्रकाशेत्यादि· प्रकाशोऽवभासः प्रवृत्तिश्चालनं निय
मः प्रतिबंधोऽर्थः प्रयोजनं येषां ते तादृशाः तत्रावभासः सत्वेन चालनं रजसा प्रतिबंधस्तमसा तथाहि सत्वं रजसा चालितं कार्यं जनयेत् यद्यावरकेन तमसा न नियम्येत तथा च तमसा

त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान् ११ प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्ति
नियमार्थाः अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः १२ सत्वं लघु प्रकाशकमिष्टमुपष्टंभकं चलं च रजः गुरु वरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः

प्रतिबंधात्तत्कार्यक्षमं न भवति अतस्तत्प्रतिबंधस्य प्रयोजनं बोध्यं· अन्योन्येति· अत्रान्योन्यपदं च चतुर्ष्वप्यन्वेति तथा चान्योन्याभिभववृत्तयः तथाहि· सत्वमुत्कटं भूत्वा रजस्तमसी अ
भिभूय शांतां वृत्तिं लभते एवं रजः सत्वतमसी अभिभूय घोरामेवं तमः सत्वरजसी अभिभूय मूढाम् अन्योन्याश्रयवृत्तयः अप्यतमो गुणः स्वकार्यार्थं अन्याश्रितः सहकारिणो रूपाप
वर्त्तते अन्योन्यजननवृत्तयः कार्यस्य त्रिगुणात्मकत्वादन्योन्यजननकाङ्क्षार्थः· अन्योन्यमिथुनवृत्तयः स्त्रीपुरुषवदन्योन्यसंयोगशीला इत्यर्थः· अत्रायं विशेषः एकोऽपि यदाधिकस्तदाऽप
रौ दुर्बलाविति तथैव दर्शनात् १२ सत्वादीनामसाधारणं धर्मं विवेकोपयोगायाह सत्वमिति· लघुत्वं लघुत्ववत् प्रकाशकं इन्द्रियार्थसंकर्षे सत्वस्यावभासके सत्वातिरेकेणेन्द्रिया लि
णां लघुतायाः उपलब्धेरिन्द्रियाणां विषयग्रहणसामर्थ्यदर्शनाच्च लघुत्वं प्रकाशकत्वं च सत्वस्य लक्षणं तत्र लघुत्वं कार्योद्गमनहेतुभूतो धर्मः इष्टं सांख्याचार्यैः उपष्टंभकं संश्लेष
जनकं चलं सक्रियं रजः सेव संश्लेषक्रियया रूपलभात्स्वरकत्वं सक्रियत्वं च रजसो लक्षणमिति भावः नन्वेतल्लक्षणेन सत्वरजस्तमांसि जात्यंतराण्येवेति लभ्यते तथा च गुरु
रुत्वं वरणं आवरकं तमसेवांग गुरुत्वविषयावभासप्रतिबंधयोर्दर्शनाद्गुरुत्वं तत्तदिंद्रियव्यापारनिवृत्तिद्वारा तत्तत्कार्यप्रतिबंधकत्वं च तमसो लक्षणमिति भावः× तेषां परस्प
प विरुद्धानां कथमेकत्र प्रवृत्तिः संभवति परस्परविरुद्धानां नाशकानामेकार्थकरणानुपलंभात् तत्राह प्रदीपवदिति· यथा तैलवर्त्तिदीपानां परस्परं विरोधेऽपि तैलवर्त्तिभ्यां सह दीपः
प्रकाशं जनयति तद्वदित्यर्थः· दीपोपमितैलं पतनेन दीपनाशात्तैलमपि दीपविरोधि एवं वर्त्तिरपि स्वल्पत्वे न दीपनाशिकेति· १३

© Dharmartha Trust J&K. Digitized by eGangotri

१११.५.पुम

अविवेकित्वादिकं प्रसाध्य साधर्म्यमुक्तं तत्सर्वं नेतुमसिद्धमित्यत आह अविवेक्यादेरिति अविवेकित्वादिकं त्रैगुण्यधर्मपरं अविवेकित्वादिकं प्रकृतिरूपमहदादिषु व्यक्तेषु ततः त्रैगुण्यात्सत्त्वरजस्तमसां त्रिगुणत्वादि
कं सहकारेण व्येनुमानमित्युक्तं तत्रत्याह तद्विपर्ययाभावादिति तस्याविवेकित्वस्य विपर्यये पुरुषे सत्त्वादिगुणत्रयाभावात् तथा च यत्राविवेकित्वाभावः तत्र त्रैगुण्याभाव इत्यन्वयव्यतिरेकव्याप्तिरस्त्येव
तस्मात्सिद्धिरस्य बाधितेति भावः ननु प्रकृतस्य मिलितं महदादौ प्रकृतेः सिद्धिरस्तु तत्राह कार्यस्येति महत्तत्त्वादीनां कारणभावे नित्यत्वापत्त्या तेनोऽनिर्मोक्षः स्यादिति न्यायेन [redacted] मेवावश्य
कं तत्र चेतनत्वं मानजातीयगुणकत्वं कारणवृत्तेरवाच्यं तदेवानुभवात् कारणैकत्वं तन्नित्यमेवाव्यक्तत्वापत्तिः स्यात् नवस्तुत्वापत्तेः स्यात् अतोऽव्यक्तं प्रधानं तत् त्रिगुणं सिद्धमित्यर्थः ॥१४॥ महदादिभेदे
नेऽप्रधाने हेतुभिः साधयति भेदानामिति कारणमस्त्यव्यक्तमित्युत्तरेण संबन्धः इति भेदः महदादयस्तेषां परिमाणात् परिमितत्वात् व्यापित्वादेकत्वरूपभेदे च लोके यद्यत्परिमितं तत्तत्कार्यं भवतीत्यव
हत्त्वादिकं प्रति पुरुषं भिन्नत्वाद्व्यापित्वात् तस्य कारणपेक्ष्यत्वात् तत्कारणं प्रधानमेवेति भावः हेत्वन्तरमाह समन्वयात् सुखदुःखमोहात्मकत्वेन समानधर्मत्वात् व्यापारेणानामेषां तत्समानस्वभावे
कारणकत्वमावश्यकं तत्कारणं प्रधानमेवेति भावः इतश्चास्ति प्रधानमित्याह शक्तितः प्रवृत्तेश्चेति शक्तिसत्त्वादेव कार्योत्पत्तेः शक्तश्च सर्वभावात् कारणांशोऽस्ति स्वप्रकृतिरेवोपकारिकायत्नेन कार्यं महद
वृत्तिः यथा मृत्पुराद्घटादेः इति भावः इतश्चास्ति प्रधानमित्याह कारणकार्यविभागादिति कारणेऽसतः कार्यस्यैव कर्मांशानामिव निःसरणात् रूपपृथक्त्वं एकभावात् रूपविभागात् महदादिकार्यस्य तादृशात् तादृशावस्थाहेतुत्व
मेवेति भावः इतश्चास्ति प्रधानं अविभागाद्वैश्वरूप्यस्य अत्र स्वार्थव्यत्ययविश्वरूपस्य विभागात् तत्त्वयेकारणेनैकीभावरूपात्प्रलयादित्यर्थः तादृशकारणं विना तेषां भिन्नानामेकीभावरूपप्रलयस्य
स्यादिति भावः ननु ब्रह्मैव तादृशकारणमस्तु कृतं प्रधानेनेति वाच्यं तस्य शक्तिमत्त्वेन कारणत्वकल्पनापेक्षया शक्तित्वेन प्रधानकल्पनाया लघुत्वादिति संक्षेपः ॥१५॥
ननु यद्येकं प्रधानं कथं तर्हि तस्माद्विविधकार्योत्पत्तिर्नैकं तत्तु ततः परेऽत्युपेतं तत्राह कारणमिति मदव्यक्तं जगतः कारणमस्ति तत् त्रिगुणतः प्रवर्तते सत्त्वादिगुणत्रयात्प्रवर्तते कार्यं जनयति तथा

अविवेक्यादेः सिद्धस्त्रैगुण्यात्तद्विपर्ययाभावात् कारणगुणात्मकत्वात्कार्यस्याव्यक्तमपि सिद्धं ॥१४॥ भेदानां परिमाणात् समन्वयाच्छक्तितः प्रवृत्तेश्च कार्यकारण
विभागादविभागाद्वैश्वरूप्यस्य ॥१५॥ कारणमस्त्यव्यक्तं प्रवर्तते त्रिगुणतः समुदयाच्च परिणामतः सलिलवत्प्रतिप्रतिगुणाश्रयविशेषात् ॥१६॥ संघातपरार्थत्वात्त्रिगुणादिवि-

गुणत्रयात्मके प्रधाने बहुत्वमस्त्येव ततो नानुपपत्तिरिति भावः एकजातीयजनकता कथं तत्राह समुदयाच्चेति मिलनाच्चेत्यर्थः गुणप्रधानभावेन मिलिता विचित्ररूपमिवैकं कार्यं जनयन्तीति भावः भवतु महदादिकार्यमेकजातीयं कार्यान्तरेषु वैषम्
यं तु कुतस्तत्राह परिणामत इति प्रतीति एकैकगुणाश्रयेण यो विशेषस्तस्मादित्यर्थः गुणवैषम्याद्वैषम्यमिति भावः तत्र दृष्टान्तः परिणामतः सलिलवदिति यथा सलिलमेकमपि नारिकेरजंबीरादिपरिणामभेदात् मधुरतिक्तादिभाव
प्रतिपद्यते तद्वदिदमपि सहकारिभेदादेव विषममिति भावः ॥१६॥ प्रधानं प्रमाणं कृत्वा पुरुषे प्रमाणमाह संघातेति एवमन्तं पूर्वस्तु नं पुरुषोऽस्तीति सनेनान्वयः संघातः पृथिव्यन्तःसमूहस्तस्य शय्यादिवत्परार्थत्वात् परप्र
योजनार्थत्वात् प्रयोजनं च सुखदुःखान्यतरसाक्षात्काररूपो भोगस्तस्य च जडे बाधाच्चेतनस्तद्वान् पुरुषोऽस्तीति युक्तिप्रमाणादिति भावः हेत्वन्तरमाह त्रिगुणादिविपर्ययादिति त्रयो गुणा यस्यादि
रसौ त्रिगुणादिस्तस्य त्रिगुणादेर्विपर्ययो भावस्तस्मात् त्रिगुणात्कार्यस्य जडत्वात्कार्यविशेषकारणत्वाच्च त्वात् किंचित्त्रिगुणाभावप्रतियोगित्वं घटादेरिवावश्यकं सर्वस्य त्रिगुणस्याभावस्त्व
त्रिगुणे पुरुषे संभवति अतस्त्रिगुणाभावाधिकरणत्वेन पुरुष आवश्यक इति भावः हेत्वन्तरमाह अधिष्ठानादिति अधिष्ठातृत्वादित्यर्थः यथा रथः सारथिनाधिष्ठितः प्रवर्तते तद्वदिद
मपि सर्वं जडत्वात्पुरुषाधिष्ठितमेव प्रवर्तते इत्यकामेनाप्यावश्यकं वाच्यं अतस्त्रिगुणाधिष्ठाता यः पुरुषोऽस्तीति भावः हेत्वन्तरमाह भोक्तृभावादिति साक्षित्वादित्यर्थः यस्येदं व्यक्ता
व्यक्तं सर्वं षड्रसादिवद्भोग्यं भवतीत्यसौ पुरुष आवश्यक इति भावः हेत्वन्तरमाह कैवल्यार्थं प्रवृत्तेश्चेति शिष्याणां मोक्षप्रवृत्तिमानाद्दृश्यन्ते मुक्तिश्च प्रकृत्यादिमध्येन कस्य विदपि स
भवति त्रिगुणत्वेन सुखदुःखमोहात्मकत्वात् तस्मान्मुमुक्षुप्रवृत्त्यादेरपमोक्षाश्रयत्वेन पुरुषसिद्धिरिति संक्षेपः ॥१७॥

© Dharmartha Trust J&K. Digitized by eGangotri

तदेवं पुरुषास्तित्वं प्रतिपाद्य तस्य बहुत्वं प्रतिपादयति जन्ममरणेति। पुरुषबहुत्वं सिद्धं कस्मात् जन्ममरणकरणानां प्रतिनियमात् आत्मनि देहसंबंधो जन्म तत्त्यागश्च मरणं करणानि चक्षुरादीनि एषां प्रति
नियमः प्रत्येकमेव दर्शनं तस्मादात्मन एकत्वे तन्न स्यात्। एकस्मिन् जाते म्रियमाणे वा सर्वे एव जाता म्रिता वा स्युः एकस्मिंश्च चक्षुषि सर्व एव सचक्षुषः स्युः एकेन दृष्टे सर्वे द्रष्टारः स्युः। न च तथा तस्माद् बहव पुरु
षा इति भावः। हेत्वंतरमाह अयुगपत्प्रवृत्तेश्चेति। एकस्य धर्मेऽन्यस्य ज्ञानेऽन्यस्य वैराग्येऽन्यस्यैश्वर्येऽन्यस्य कामादौ प्रवृत्तिरित्येवं प्रवृत्तिभेदादित्यर्थः। आत्मन एकत्वे सर्वेषामेकस्मिन्नेवार्थे युगपत्प्रवृत्तिः
स्यान्न च तथा तस्मादपि बहव पुरुषा इति भावः। हेत्वंतरमाह त्रैगुण्यविपर्ययाच्चैवेति। एकारश्चाभिन्नक्रमः सिद्धमित्यस्यानन्तरं द्रष्टव्यः सिद्धमेव नास्ति त्रयो गुणा स्त्रैगुण्यं तस्य विपर्ययः परिणामभेदः
कश्चित्सुखमेव कश्चिद् दुःखमेव कश्चिन्मोह एवेत्येवं विभक्तस्तस्मात्तथात्रैगुण्यविपर्ययो भेदः सात्त्विकराजसतामसभेदेन पुरुषस्य तस्मादेकत्वपक्षे तु सन्न स्यात् किंतु सर्वे सुखिनः दुःखिनो वा स्युः एवं त्रिगु
णभेदेन नीचोत्तममध्यमव्यवस्थापि न स्यात्। न चांतःकरणभेदात्तथेति वाच्यं अन्तःकरणभेदे पुरुषभेदस्यैव बीजत्वादन्यथा तद्व्यस्याप्रमाणिकत्वादिति भावः १८। एवं पुरुषस्य बहुत्वं प्रसाध्य
विवेकज्ञानोपयोगितया तस्य धर्मानाह तस्माच्चेति। त्रिगुणादेर्यो विपर्यासो त्रिगुणत्वं विवेकित्वमविषयत्वमसाधारणत्वमप्रसवधर्मित्वं च तस्मात्। तत्र चेतनत्वात् द्रष्टृत्वं स्वप्रकृतिभोगकाले तं प्रकृतिर्मम संसारं कामयति न तु स एवं संसारवान् किंतु प्रकृ
तिरेवासौ वक्ति लेपशतिधर्मत्वं अत्रैगुण्यात्कैवल्यं आत्यंतिक दुःखत्रयाभावस्तं तथा माध्यस्थ्यं उपकारापकारयोः अमित्र रहितत्वं अकर्तृभावो कर्तृत्वं कर्तृत्वादिमत्त्वे नद्रष्टृभावात् कर्तृत्वे प्रकृत्या न स्यात् प्रकृतिश्चैव दीपघनादीन्दवभासकत्वदर्शनादि
ति संक्षेपः। १९। ननु प्रकृतिर्बुद्धितत्त्वनिष्ठा चैतन्यमात्मनिष्ठं कथं तर्हि जानाम्यहमिदं करोमीति कर्तृचैतन्ययोः सामानाधिकरण्यप्रतीतिरित्याह तस्मादिति। यतश्चैतन्यकर्तृत्वे भिन्नाधिकरणे कथं प्रतीतः। सिद्धेन तस्मात् प्रतीतिरियमित्यर्थः। भ्रान्तिवी
जं तत्संयोगादिति। तस्य पुरुषस्य संयोगः सन्निधानं प्रतिबिंबवत्त्वं तस्मादचेतनमपि लिंगं बुद्धितत्त्वं चेतनावदिव जानामीति ज्ञानवदिव भवति। एवं गुणकर्तृत्वे गुणाः सुखदुःखमोहरूपाः कर्तृत्वं तथा बुद्धिनिष्ठमात्मनि प्रतीतिं विदितं भव
ति। तेनोदासीनोऽपि पुरुषः करोमीति कर्तेव भवति। अतो जानाम्यहमिदं करोमीति मम योधर्मिणो नैदाप्यमादिनियमेन धर्मसंसर्ग प्रहरूपो भ्रम एव तयोः स्वभावतस्त्वयादिति संक्षेपः २०। किमर्थं तयोः संसर्ग इत्यत आह पुरुषस्येति पुरु

जन्ममरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च। पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव। १८। तस्माच्च विपर्यासात् सिद्धं साक्षित्वमस्य पुरुषस्य। कैवल्यं माध्यस्थ्यं द्रष्टृत्वमकर्तृभावश्च। १९। तस्मा
त्तत्संयोगादचेतनं चेतनावदिव लिङ्गम्। गुणकर्तृत्वे च तथा कर्तेव भवत्युदासीनः। २०। पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य। पंग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः। २१। प्रकृतेर्महांस्ततो

[redacted] षस्य प्रधानस्य चोभयोरपि दर्शनार्थं कैवल्यार्थं च संबंधः। दर्शनं भोगः प्रधानस्य पुरुषेण कैवल्यं ऽहंकारस्तस्माद् गणश्च षोडशकः। तस्मादपि षोडशकात् पञ्चभ्यः पञ्च भूतानि। २२॥ ॥
मोक्षः तत्पुरुषान्यतारख्यातिनिबंधनं पुरुषस्य प्रधानेन विना संभवात्तयोः प्रधानपुरुषयोर्द्वयोः संयोगो भोक्तृभोग्यभाववत् सन्निधानं भवतीत्यर्थः। उभयस्य कार्ये उभयस्यैवापेक्षेत्यत्र दृष्टांतः पंग्वंधवदिति। यथा पंग्वंधयोरेकत्र मेलने पंगुरंधस्य
मार्गप्रदर्शनायांधश्च पंगोर्नयनाय भवति तद्वदित्यर्थः। भोगापवर्गयोः कारणभूतः सर्गोऽपि संयोगादेवेत्याह तत्कृत इति। महदादिलक्षणः सर्गः संयोगजन्य एवेत्यर्थः। अत एव प्रलये न सर्गः तयोः संयोगाभावादिति भावः २१। सर्गक्रममाह प्रकृतेरि
ति। अचेयं प्रक्रिया एकं प्रकृतितः किंचिन्न्यूनपरिमाणं महत्तत्वं अंशांशिभावापन्नं जायते। तत्रांशः बुद्धिनतानत्वा आत्मसमसंख्याकाः प्रतीकप्रमेयमात्र परिमाणकाजीवभोगाय भवंति तेषामाधारैका प्रकृतिरेव। एवं महत्तत्त्वात् तद्वदल्प प
रिमाणोऽहंकारोंऽशांशिभावापन्नो भवति। तत्रांशाः सूक्ष्मा आत्मसमसंख्याः स्वस्वैव भोगाय भवंति। [redacted] षोडशको गणः सैकादशेंद्रियाणि वक्ष्यमाणानि पंचतन्मात्राणि च। तस्मादपि षोडशकात्। तं षोडशकं प्राप्य ये ते भ्य
पंचभ्यः पंचतन्मात्रेभ्यः पंचमहाभूतानि भवंति। तत्र शब्दतन्मात्रादाकाशं तस्य शब्दो गुणः। शब्दतन्मात्रसहितात् स्पर्शतन्मात्राद्वायुः शब्दस्पर्शगुणवान्। शब्दस्पर्शसहिताद्रूपतन्मात्रात्तेजः शब्दस्पर्शरूपगुणकं शब्दस्पर्शरूपतन्मात्रसहिता
द्रसतन्मात्राज्जलं शब्दस्पर्शरूपरसगुणं। शब्दस्पर्शरूपरसतन्मात्रसहितात् गंधतन्मात्रात् पृथ्वी शब्दस्पर्शरूपरसगंधगुणेति। अत्र संग्रहः। वियदेकगुणं प्रोक्तं द्विगुणो मातरिश्वनः। त्रयस्तेजसि चत्वारः सलिले पंच भूमिगा इति।
अहंकारादेव पंच महाभूतानि भवंतीति नेतुं युक्तं शब्दादिगुणकानां तेषामहंकारतत्त्वनैरस्याभावादहंकारस्य शब्दाद्यभावात्। न चाहंकारस्य पंचगुणवत्त्वे मानमस्ति। तथा सत्याकाशादीनां पंचानामेव
पंचगुणवत्त्वं स्यात् देवता संद्रियत्राणगुणत्वस्यैव भूतत्वेन तस्यापि भूततापत्तेः स्वस्य स्वकारणत्वानुपपत्त्या तत्संभूतकारणत्वं प्रकृति विशेषश्च स्यात्। न चाहंकारस्य शब्दाद्यभावे कथं तस्माच्छब्दादि त
न्मात्रोत्पत्तिरिति वाच्यं हरिद्रादीनां चूर्णादिसंयोगे रक्तरूपवत् अहंकारादिसंयोगे शब्दतन्मात्राद्युत्पत्तिसंभवात्। न च स्थूलानामेवमहंकारादुत्पत्तिर्वक्तुं शक्यते इति वा
च्यं स्वविशेषणगुणवद्द्रव्योपादानकत्वव्याप्येन स्थूलत्वेन परिशेषात् स्थूलभूतानुमानादहंकारोपादानकत्वनिरासादित्याद्यन्यत्र ... मज्ञातीयेषु शांतघोरमूढाख्यविशे

© Dharmartha Trust J&K. Digitized by eGangotri

बुद्धेर्लक्षणमाह अध्यवसायो बुद्धिरिति अध्यवसायो मयेदं कर्त्तव्यमित्याकारनिश्चयो दीपस्य शिखेव बुद्धिपरिणामो वस्या विशेषः परिणामपरिणा... ...योगः चैतन्यस्य सदैकस्वभावस्य
विषयावभासयेति आपेन्द्रियाणां व्यासंगोपपत्तये मनसः महिषसाधनत्व बुद्धेर्महं शभानापाहंकारस्य कृत्यसाध्येयं ध्यायेऽप्रवृत्तिकारकस्य कर्त्तव्यताध्यवसायस्य संभवाय बुद्धितत्त्वस्यावश्यकत्व
मिति स्वपरूपं बुद्धिधर्मानाह धर्मो ज्ञानमिति धर्मो गंगास्नानादिजन्यो यागयोगजन्यश्च ज्ञानमात्मसाक्षात्कारः विरागो वैराग्यं तच्चतुर्विधं यतमानव्यतिरेकैकेन्द्रियवशीकारसंज्ञाभेदात् तत्र रागादिक
पायपाचनार्थं निवृत्तिधर्मारंभो यतमानं पक्वापक्वानां पाणामभ्यस्यमानविवेकवशेन चिकित्सकवद्दृढकरणं व्यतिरेकः पक्वसर्वकषायज्ञाने न चित्तोत्सुकता एकेन्द्रियं सर्वविषयतृष्णारहितेनो
त्सुक्यस्यापि निवृत्तिर्वशीकारात्मक्यं ऐश्वर्यमिति तदष्टविधं तदुक्तं अणिमा महिमा चैव लघिमा प्राप्तिरिन्द्रियैः प्राकाम्यं श्रुतदृष्टेषु यत्र कामावसायिता ईशितावशित्वं संगो यत्कामस्तदवस्यतीति मूर्तेः परीनव्याणुता महिमा
योजनादिव्यापित्वं लघिमा तूलादिवल्लघुत्वं भिश्वरव्यांगुल्यग्रेण चन्द्रमसंस्पर्शनीसादिरूपसामर्थ्यमिन्द्रियैः प्राप्तिरित्युच्यते श्रुतदृष्टेषु प्राकाम्यमिच्छानभिघातः यथाम्भसीव जले निमज्जनोत्सादि ईशिता भूत
भौतिकानां सर्वेषां संकल्पमात्रेणाप्रेरणं वशिता गुणोभूताधनथीमतास्यसंकल्पनायत्कामस्तदवस्यतीसनैनोक्ता एतद्विपर्यस्तं एतद्विपरीतं अधर्माज्ञानावैराग्यानैश्वर्यरूपं तत्राधर्मः परस्त्रीसंगादिजन्यः अज्ञानं अनित्ये
ष्वेकात्मादौ नित्यबुद्धिः अशुचौ स्त्रीकायादौ शुचिबुद्धिः दुःखे संसारे सुखबुद्धिः अनात्मनि देहादावात्मबुद्धिरौर्वोरभिसादिका अवैराग्यं विषयतृष्णाभनैश्वर्यं स्वाभिमतविपरीतं २३ अहंकारस्य लक्षणमाह अभिमानोऽहंका
र इति अहंकारोऽहमित्यंतर्गर्वेन प्रत्ययोऽभिमानात्मिको योऽभिमद्विषसाधनमिदमत्रास्मधिकृत इत्याकारकस्तत्र हेतुः कार्यकारणयोरभेदादभिमानोऽहंकारः अहमित्यस्य पुरुषमात्मीयमित्यपदेश्यकारो तीति ताहमा
नात्मिकमहंकारत्वं भेदाग्रहात्मकमनात्मनि सोऽयमहंकार इत्यभिप्रायः तस्य कार्यभेदमाह तस्माद्द्विविध इति तस्मादहंकारात्सर्गः सृज्यत इति सर्गः प्रपंचः सोऽयं गणरूपो वा तनुस्य भेदेन द्विप्रकारः प्रवर्ततेऽलघते
प्रकारद्वयमाह ऐन्द्रियइति तत्र तस्मादहंकारान्नयादेन्द्रियमिन्द्रियजातीयस्तस्मादपरोगणएकादशको हस्त्रः चपुनः तन्मात्रपंचकस्तन्मात्राजातीयः एकादशगणस्तस्य भवत्येकः २४ ननु कथमेकस्मादहंकाराद्द्विवि

अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्यं सात्त्विकमेतद्रूपं तामसमस्माद्विपर्यस्तं २३ अभिमानोऽहंकारस्तस्माद्द्विविधः प्रवर्तते सर्गः ऐन्द्रिय एकादशकस्तन्मात्रपंचकश्चैव २४ सा
त्त्विक एकादशकः प्रवर्तते वैकृतादहंकारात् भूतादेस्तन्मात्रः स तामसस्तैजसादुभयं २५ बुद्धीन्द्रियाणि चक्षुःश्रोत्रघ्राणरसनत्वगाख्यानि वाक्पाणिपादपायूपस्थान् कर्मेन्द्रियाण्याहुः २६ उभ
यात्मकमत्र मनः संकल्पकमिन्द्रियं च साधर्म्यात् गुणपरिणामविशेषान्नानात्वं बाह्य
सर्गस्त्वाह सात्त्विकइति प्रकाशलघिमध्यामेकादशक इन्द्रियगणः सात्त्विक उद्रिक्तसत्त्वगुणकादहंकारादित्युक्तं तोयमहंका
रइति सांख्याचार्यसंकेतविषयादहंकारात्प्रवर्त्तते भूतादेस्तामसादुद्रिक्ततमोगुणकादहंकारात्तन्मात्रकोगणः प्रवर्त्तते कस्माद्यतः स तामसः तामसगणस्य समानजातीयकारणादेवोत्पत्तेरुचितत्वात् ननु यदि सत्त्व
तदा मोभ्यामेव कार्यं रजसः किंप्रयोजनं तत्राह तैजसादुभयमिति उक्तं रजोगुणकादुभयं गणद्वयं भवति सत्त्वतमसोः स्वतो क्रियत्वेन रजः प्रेर्यत्वात् तदुभयकार्ये रजः कार्यमेवातो रजोगुणोऽप्यावश्यक इति भावः तत्रे
न्द्रियजनकस्य वैकृतत्वकथनं लघुकार्यजनकत्वाभिप्रायकं तन्मात्रजनकस्य भूतत्वादित्वकथनं तामसत्वमहाकार्यजनकत्वाद्यभिप्रायकं रजोगुणकस्य तैजसत्वकथनं सृष्टिसमर्थत्वाभिप्रायकमिति बोध्यं
२५ एकादशेन्द्रियाणां मध्ये दशबाह्येन्द्रियाणि तान्याह बुद्धीन्द्रियाणीति शब्दस्पर्शरूपरसगंधा बुध्यन्ते एभिरिति बुद्धीन्द्रियाणि वक्षुरादीनि रूपाद्युपलब्धिहेतुत्वेन सिद्धान्यतीन्द्रियाणि तत्र गोलकाधिष्ठितानि तत्र चक्षुः चष्टे
नेति व्युत्पत्त्या वक्षुः पदाभिधेयं नयनं रूपादिषु मध्ये रूपस्यैव ग्राहकं श्रोत्रं शृणोत्यनेनेति व्युत्पत्त्या श्रोत्रपदाभिधेयं कर्णविवरसंग्राहकं शब्दादिषु मध्ये शब्दस्यैव ग्राहकं घ्राणं जिघ्रत्यनेनेति व्युत्पत्त्या घ्राणपदाभिधेयं गंधादिषु मध्ये गंधस्य
ग्राहकं रसनं रस्यतेऽनेनेति व्युत्पत्त्या रसादिषु मध्ये रसस्यैव ग्राहकं स्पृश्यतेऽनेनेति व्युत्पत्त्या स्पर्शनपदाभिधेयं त्वगिन्द्रियं सर्वशरीरव्यापि स्पर्शादिषु मध्ये स्पर्शस्यैव ग्राहकं तनालक्षणोपीदं व्याप्यग्राहकं अन्यानि कर्मेन्द्रियाण्याह वाक्पाणीति विवेकः वा
गादीनीति कर्म कुर्वन्तीति कर्मेन्द्रियाणि तानि च विषयाविषयाण्येतेषां सर्वेषामिन्द्रियसंज्ञा कुतः इति चेत् अन्यदेन विषया नोप्रतिष्ठन्तीति व्युत्पत्त्या इन्द्रियाणां चक्षुरादीनां च रूपादिगुणग्राहकत्वेन तत्तद्भूतानुमानं सुमं साधीयः अप्रयोजकत्वादिति स्वयमूह्यं २६
एकादशमिन्द्रियं मनस्तल्लक्षणमाह उभयात्मकमिति मनः संज्ञकमिन्द्रियं संकल्पकं सामान्यतः इन्द्रियेण गृहीतमर्थं सम्यक् कल्पयतीति विशेषणविशेष्यभावेन चेतयतीति निर्विकल्पजनकार्यकारणमोभयदात्मकं उभयात्मकं बुद्धि
सहकारित्वात् ज्ञानात्मकं कर्मेन्द्रियसहकारित्वात् कर्मात्मकं च मनोधिष्ठानेनैव तेषां स्वकार्यजननात् ननु भवतु मनो महदहंकारवत्तदिन्द्रियं कथमेकादशमिन्द्रियं तदिन्द्रियत्वं तदेव नास्तीत्याह इन्द्रियं चेति कुतः साधर्म्या
त् इन्द्रियान्तरैः सात्त्विकाहंकारोपादानत्वं साधर्म्यं तस्मात् महदहंकारयोस्तु नेन्द्रियत्वं तयोस्तदभावादिति भावः एतेन मनो नेन्द्रियं प्रत्यक्षत्वादिन्द्रियस्य नातीन्द्रियत्वादिति केषांचिन्मतं तन्निरस्तमिति ज्ञेयं इन्द्रियलक्षणं स्वस्वमते मनसा साधर्म्यं स्यादिन्द्रियत्वादिति

© Dharmartha Trust J&K. Digitized by eGangotri

तत्र बाह्येन्द्रियेषु ज्ञानेन्द्रियाणां व्यापारमाह· रूपादिष्विति· पंचानां बुद्धीन्द्रियाणां चक्षुरसनाघ्राणश्रोत्रत्वचां रूपादिषु रसगंधशब्दस्पर्शेषु आलोचनी निर्विकल्पकवृत्तिः फलं मात्रपदाद् दानादि
क्रियाव्यवच्छेदः· तत्र चक्षुषो रूपे रसनाया रसे घ्राणस्य गंधे श्रोत्रस्य शब्दे त्वचः स्पर्शे सामर्थ्यमिति विवेकः· कर्मेन्द्रियव्यापारमाह· वचनेति· पंचानां कर्मेन्द्रियाणां वचनादिकर्माणि
व्यापारा इत्यर्थः· तत्र वचनं उच्यतेनेनेति कंठताल्वादिकर्म वागिन्द्रियस्य आदानं ग्रहणं हस्तस्य विहरणं गमनं पादयोः उत्सर्गो मलत्यागात्मकं कर्म पायोः आनन्दः आनन्दयतीति
उपस्थस्य रतिरूपस्यस्येति बोध्यं· २८ बुद्ध्यहंकारमनसां वृत्तिमाह· स्वालक्षण्यमिति· स्वमसाधारणं लक्षणं येषां तानि स्वलक्षणानि महदहंकारमनांसि तेषां भावः स्वालक्षण्यं·
वृत्तिर्व्यापारः· तत्र महतोध्यवसायः अहंकारस्याभिमानः मनसः सविकल्पकसंकल्पापरपर्यायं भेदकमित्यर्थः· साधारणत्वासाधारणत्वाभ्यां वृत्तेर्द्वैविध्यमाह सैषेति ए
षा वृत्तिः असामान्या असाधारणी सामान्यामाह· सामान्येति· सामान्या बाह्योकरणवृत्तिर्येति सामान्यकरणवृत्तिः· पंचप्राणाद्या वायवः जीवनादिद्वारा सर्वकरणव्यापारत्वा
त्तदन्वयव्यतिरेकानुविधायित्वादिन्द्रियव्यापारस्येव तद्व्यापारानुविधायित्वात्प्राणादीनां भेदः स्थानभेदादुक्तो ग्रंथेषु यथा हृदि प्राणो गुदेपानः समानो नाभिदेशगः उदानः कंठदे
शे व्यानः सर्वशरीरग इत्यास्तां विस्तरतः २९ असाधारणेषु व्यापारेषु यौगपद्यक्रमावाह· युगपदिति· दृष्टे प्रत्यक्षविषये तस्य चतुष्टयस्य बाह्येन्द्रियमनोहंकारमहत्त्वस्य युगप
द्वृत्तिः क्रमशश्च भवति· तथाहि विद्युत्संपाते व्याघ्रादिविन्द्रियसंनिकर्षे युगपदेव निर्विकल्पकसविकल्पकाभिमानाध्यवसायाः प्रादुर्भवन्ति· अतस्ततो कदाचित्सपदि सरति क्रमश
श्च यथा मंदालोके प्रथमं किंचिदिदमिति जानाति· पश्चाच्छुकमिति निश्चिनोति ततो मां प्रत्येतीत्यभिमन्यते अथाध्यवस्यति अपसरामीतः स्थानादित्येवं क्रमेण तेषामेते मा

रूपादिषु पंचानामालोचनमात्रमिष्यते वृत्तिः वचनादानविहरणोत्सर्गानंदाश्च पंचानां २८ स्वालक्षण्यं वृत्तिस्त्रयस्य सैषा भवत्यसामान्या सामान्यकरणवृत्तिः प्राणाद्या वायवः पंच २९
युगपच्चतुष्टयस्य वृत्तिः क्रमशश्च तस्य निर्दिष्टा दृष्टे तथाप्यदृष्टे त्रयस्य तत्पूर्विका वृत्तिः ३० स्वां स्वां प्रतिपद्यंते परस्पराकूतहेतुकां वृत्तिं पुरुषार्थ एव हेतुर्न केनचित्कार्यते करणं ३१ करणं
त्रयोदशविधं तदाहरणधारणप्रकाशकरं कार्यं च तस्य दशधाहार्यं धार्यं प्रकाश्यं च ३२ अन्तःकरणं त्रिविधं दशधा बाह्यं त्रयस्य विषयाख्यं सांप्रतकालं बाह्यं त्रिकालमाभ्यंतरं करणं ३३ बुद्धी
न्द्रियाणि तेषां पंच विशेषाविशेषविषयाणि वाग्भवति शब्दविषया शेषाणि तु पंचविषयाणि ३४॥

पारा भवंति· तथा अदृष्टे परोक्षविषये त्रयस्यांतःकरणत्रयस्य युगपत्क्रमशश्च व्यापारा ज्ञेयाः अनुमानशब्दयोर्विषये इंद्रियाप्रवृत्तेस्तत्पूर्विकेत्युक्तं तयोर्विषये निर्विकल्पकाभावात्सर्वं मनस एव व्यापारः अनुमानशब्दविषये इति हितम्
विकारस्य सविकल्पकेति विशेषः अनुमाने व्याप्तिज्ञानापेक्षया शब्दे शक्तिज्ञानापेक्षया प्रसक्तापेक्षेति संक्षेपः ३० ननु युगपत्पक्षे न संभवति इन्द्रियव्यापाराधीनप्रवृत्तिकत्वान्मनसः एवमहंकारमहतोर्मनोहंकारव्यापाराधीनव्यापारकत्वात्
अत आह स्वां स्वामिति· आकूतमभिप्रायः स च अचेतनानां बाधित इत्याकूतमत्र प्रवृत्त्युन्मुखत्वं तच्चैकस्य व्यापारजननसमय एव तद्व्यापारं प्रति बाधकाभावादन्यस्यापि स्वकाल इति यौगपद्यं संभवति क्रमपक्षे तु यथादिरेव बाधक इति बोध्यं· स्वां स्वामिति पद
तेनान्येन युगपत्संभवेपि माष्टीकपक्षकानामिव हेतुभेदान्नियतिसंकरः इति शंकितं तथापि करणं केन प्रवर्त्यते तत्राह पुरुषार्थ इति· भोगापवर्गलक्षणः पुरुषार्थ एव स्वविषयके आहारादिकरणव्यापारे हेतुर्निसर्गः कार्यते प्रेर्यते ततश्चेत्यर्थात् जीवः क
र्ता भवति प्रवर्तक ईश्वरः न तु न तदपेक्षायां मानाभावादिति भावः ३१ करणानि कानि तत्राह करणमिति· त्रयोदशविधं बुद्ध्यहंकारावेकादशेन्द्रियाणि च एषां व्यापारानाह· आहरणेत्यादि· आहरणं कर्मेन्द्रियाणां धारणं महदहंकारमनसां
प्रकाशनं पंचबुद्धीन्द्रियाणां व्यापारविषयाः कतिविधा इत्यत्राह· कार्यं चेति· तस्य त्रयोदशविधस्य· तत्राहार्यं दिव्यादिव्यभेदेन प्रत्येकं द्वैविध्यात् दशधा कर्मेन्द्रिया[illegible] एवं धार्यं प्रकाश्यं चेति दिव्यादिव्य
भेदाद्दशधा बुद्ध्यहंकारमनसां प्रकाश्यं शब्दस्पर्शरूपरसगंधाख्यं दिव्यादिव्यभेदाद्दशधा बुद्धीन्द्रियाणां ३२ त्रयोदशकरणानां भेदमाह· अंतःकरणमिति· महदहंकारमनांसि त्रिविधं अंतः[illegible] बाह्यकरणं दशधा पंच बुद्धीन्द्रियाणि पंच कर्मेन्द्रियाणि
दानं त्रिविधस्यांतःकरणस्य विषयं व्यापारमानव्यापारं जनयतीति विषयाख्यं मनोहंकारबुद्धीनां व्यापारे बुद्धीन्द्रियव्यापारस्योपयोगात् कर्मेन्द्रिय[illegible] व्यापारस्यापि बुद्धीन्द्रियद्वारांतःकरणव्यापारे उपयोगः कर्मेन्द्रियव्यापारेणैव ज्ञाने
नेपरार्थे बुद्धीन्द्रियप्रवृत्त्याकरणप्रवृत्तेः बाह्येन्द्रियं [illegible] मानमात्रविषयकं बाह्यं करणं इन्द्रियं कर्मेन्द्रियं च संप्रयोगात् त्रिकालं अतीतानागतवर्तमानविषयं तच्चानुमानशब्दसहकारेणातीतानागत
विषयकमिंद्रियसहकारेण वर्तमानमात्रविषयकं आभ्यंतरं मनोबुद्ध्यहंकाराख्यं ३३ बाह्येन्द्रियाणां विषयान्विवेचयति· तेषां दशानामिन्द्रियाणां मध्ये बुद्धीन्द्रियाणि विशेषा योग्या अविशेषास्तन्मात्राणि योगिनां तेषां योग्यायोग्यवर्तमानानां

वाह्येंद्रियाणामप्राधान्यं वक्तुमाह सांतःकरणेति अंतःकरणेन मनोहंकाराभ्यां सहिता बुद्धिर्यस्मात्सर्वं मिन्द्रियोपनीतं विषयं पुरुषोपकारकं अवगाहते अध्यवस्यति तस्मात्त्रिविधमंतःकरणं द्वारि द्वारम
स्यास्तीति कृत्वा द्वारिणि दशेंद्रियद्वाराणि साक्षात्संपरयावेंद्रियद्वारिवांतःकरणानां विषयावगाहनानुद्वारत्वं यान्योपकारकत्वं ग्रामाद्वारवत् प्राग्युक्तादिशा वोध्यं ३५ अंतःकरणेषु बुद्धेः प्राधान्यं वक्तुमाह
एते प्रदीपकल्पा इति एते गुणविशेषाः गुणानां भेदाः सत्वाद्याये ते दशेंद्रियमनोहंकाराः पुरुषस्य कृत्स्नमर्थं प्रकाश्य बुद्धौ प्रयच्छंति तज्ज्ञ प्रकाशयंति यथा दीपो घटं प्रकाश्य पुरुषे माषयति बुद्धिरपि न स्वा
र्था किं तु परार्थैवेत्याह सर्वमिति सर्वं शब्दादियोग्यं प्रतिपुरुषोपभोगः पुरुषस्य यस्मात्साधयति तस्मात्सा प्रधानापि परार्थैव न स्वार्थेति भावः मोक्षहेतुज्ञानजनकत्वादपि सा तथेत्याह सैव पुनर्विवेक
ज्ञायां प्रधानपुरुषयोरंतरं वैलक्षण्यं सूक्ष्मं अतिदुर्ज्ञेयं विशिनष्टि विषयीकरोति अध्यवसायरूपत्वाद्बुद्धिरेव तथेति भावः ३७ अविशेषविशेषावुक्तौ तौ कावित्यत आह तन्मात्राणीति तन्मात्रा
णि सूक्ष्माणि शब्दादीनि अविशेषाः अयोग्यत्वात्तेभ्यः तन्मात्रेभ्यः पंचभ्यो भूतानि स्थूलानि पृथिव्यादीनि एते पृथिव्यादयो विशेषाः योग्यत्वात् कुतः शांतेति च एको हेतो द्वितीयः समुच्च
येय स्मादाकाशादिषु स्थूलेषु के चित्कान्ताः सत्वप्रधानतया सुखकराः प्रसन्ना लघवश्च के चिद्रजःप्रधानतया घोराः दुःखकराः के चित्तमः प्राधान्यान्मूढा मोहकरा गुरवश्च गुणानां गुण
प्रधानभावता यथेदं तथोपपादितमधस्तात् ३८ एतावन्त एव विशेषा इति न किं त्वन्येपि सन्तीत्याह सूक्ष्मेति सूक्ष्मा लिंगशरीराख्याः मातापितृजाः स्थूलदेहाः प्रभूता पर्वतादि
स्थाधाः विशेषका यत्वात्त्रिशेषास्तत्र सूक्ष्मदेहाः सूक्ष्मतन्मात्राद्यारब्धत्वात् मातापितृजाः स्तु मातापितृभुक्तान्नजं शुक्रशोणिताद्यारब्धत्वात् प्रभूता स्तु तद्भिन्नलक्षणकारणकत्वात्ते
षां मध्ये सूक्ष्मा नियता आमोक्षावस्थायिनः मातापितृजा निवर्तंते मरणकालपतंतीत्युपलक्षणं तत्र प्रभूतानां तौ पातिवर्तंते इति वोध्यं विशिष्यकथनं तु गौणेन जीवनाभिप्रायकं वोध्यं ३९

सांतःकरणा बुद्धिः सर्वं विषयमवगाहते यस्मात् तस्मात्त्रिविधं करणं द्वारि द्वाराणि शेषाणि ३५ एते प्रदीपकल्पाः परस्परविलक्षणा गुणविशेषाः कृत्स्नं पुरुषस्यार्थं प्रकाश्य बुद्धौ प्र
यच्छन्ति ३६ सर्वं प्रत्युपभोगं यस्मात्पुरुषस्य साधयति बुद्धिः सैव च विशिनष्टि पुनः प्रधानपुरुषांतरं सूक्ष्मं ३७ तन्मात्राण्यविशेषास्तेभ्यो भूतानि पंच पंचभ्यः एते स्मृता विशेषाः शांता घो
राश्च मूढाश्च ३८ सूक्ष्मा मातापितृजाः सह प्रभूतैस्त्रिधा विशेषाः स्युः सूक्ष्मास्तेषां नियता मातापितृजा निवर्तन्ते ३९ पूर्वोत्पन्नमसक्तं नियतं महदादिसूक्ष्मपर्यन्तं संसरति निरुपभोगं भावैरधिवासितं लिंगं ४० चित्रं य
थाश्रयमृते स्थाण्वादिभ्यो विना यथा छाया तद्वद्विना विशेषैर्न तिष्ठति निराश्रयं लिंगं ४१ पुरुषार्थहेतुक

लिंगशरीरस्वरूपमाह पूर्वोत्पन्नमिति लिंगं लिंगशरीरं पूर्वोत्पन्नं पूर्वस्मिन्नादिसर्गे पूर्वस्मा
त्प्रधानादुत्पन्नं आविर्भूतं असक्तं अव्याहतं शिलामप्यनुप्रविशतीति नियतं प्रसात्मभिन्नं महदादिसूक्ष्मपर्यन्तं महदहंकारमनोदशेंद्रियतन्मात्रसमुदायरूपं संसरति वनवं स्थूलशरीरमुपादत्ते पूर्वं पूर्वं च जहातीति निरु
पभोगं स्थूलदेहं विना भोगायासमर्थं भावैरधिवासितं भावैर्योगादिभिर्वंतनभवैश्चाधिवासितं तत्संस्काराधानं यागजसंस्कारो ह्यस्मेव ४० ननु तर्हि सोहंकारेंद्रियबुद्धित एव भोगे सुकरे नं सूक्ष्मशरीरेण प्रामाणिके
नेत्यत आह चित्रं यथेति आश्रयं विना यथा चित्रं न तिष्ठति तदाश्रयेव तिष्ठति न तद्विशेषैर्विना तिष्ठति सूक्ष्मैः शरीरैर्विना लिंगं लिंगनाज्ञापनाद्बुध्यादिकं वृत्तितन्मात्रादिसमुदायरूपं सालिंगं नाश्रयं न तिष्ठति किं तु सू
क्ष्मशरीराश्रयमेव तिष्ठ स्ततश्चोधाधर्मिभूतं सूक्ष्मशरीरमावश्यकं ततः सत्ववतः कापालाण वद्धं वभागं ततं अंगुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलादित्यादि प्रमाणाच्चेतिभावः के चित्तु स्थूलशरीराभिप्रायक
मिदमिति वर्णयंति तथाहि लिंगं समुदायात्मकं लिंगशरीरं विशेषैः स्थूलदेहैः विना निराश्रयं सन्न तिष्ठति किं तु स्थूलशरीरमाश्रित्यैव तिष्ठति अतो न लिंगशरीरेण स्थूलशरीरस्यान्यथासिद्धिरिति भावः शेषं स्प
ष्टं ४१ एवं सूक्ष्मशरीरस्यास्तित्वमुपपाद्य यथा संसरति येन च हेतुना तदुभयमप्याह पुरुषार्थेति निमित्तं धर्मादि नैमित्तिकं धर्माद्विकारं स्थूलदेहादि तदुभयप्रसंगेन तदुभयसंबंधेन लिंगमिदं सूक्ष्मशरीरं न
टवद्व्यवतिष्ठते यथा नटो वहूनि विविधानि रूपाणि गृहीत्वा व्यवहरति न पृथक् तथेदमपि देवादिशरीरैः परिगृह्य व्यवहरति विभुत्वं तत्र आह पुरुषार्थहेतुकमिति पुरुषार्थो हेतुर्निमित्तं यस्य तादृशं पुरुषार्थफलकमि
तियावत् तत्र भोगाख्यवलानां भोगार्थमेव तथा तत्पाव्यवहरं जीत्यर्थः कुतोस्येवं विधौ मतिमत आह प्रकृतेर्विभुत्वयोगादिति तथाच पुराणं वैश्वरूप्यात्प्रधानस्य परिणामोयमीदृश इति प्रकृत्या बुद्धापगमात्मांम

५

भाक्तवैकृतकेषाः प्रसिद्धत्वात्तौ बौ तत्राह सांसिद्धिकाश्चेत्यादि भावा धर्माद्याः सांसिद्धिकाः स्वाभाविकास्त एव प्राकृतिकाः वैकृतास्तु स्थायिनो यथा मत्सला ... वैकृतिकाः कदाचिदुत्पद्यन्ते तेषां मध्ये धर्माद्याः करणं बुद्धितत्त्वं तदाश्रयिणो द
ष्टाः सांख्याचार्यैः कार्याश्रयिणः कार्यं शरीरं तदाश्रयिणः कललाद्याः कललं बुद्बुदं मांसपेशी कंडरांगप्रत्यंगं गर्भस्थस्य तत्तो निर्गतस्य बाल्यकौमारयौवनवार्द्धकानीति संक्षेपः । ४३ । बुद्धिनिष्ठानां धर्मादीनां प्रयोजनमाह धर्मेणेति
धर्मेण केवलश्रुतेनपरहिंसावर्जितेन श्रुतिकर्मणा न च परहिंसापूर्वकेण ऊर्द्ध्वं ब्रह्मप्राजापत्यैन्द्रगान्धर्वयक्षपैशाचादिषु लोकेषु अधस्ताद्रौरवमहारौरववह्निवैतरणीकुंभीपाकतामिस्रांधतामिस्रादिनरकेषु अधर्मेण शा
स्त्रनिषिद्धाचरणेन परपीडनादिना गमनं भवति ज्ञानेन आत्मसाक्षात्कारेण अपवर्गो मोक्षः विपर्ययात् अज्ञानाद् बंधः प्राकृतिकवैकृतिकदाक्षिणभेदेन त्रिविधः तत्र प्राकृतिकः आत्मबुद्ध्या प्रकृत्युपासननिबंधनः
यथा प्रणीतं सह सन्तुष्टिमित्यत्र चिंतकाइतिवैकृतिकः आत्मबुद्ध्येन्द्रियोपासननिबंधनः यथा दशमन्वन्तराणीह तिष्ठंतीन्द्रियचिंतकाइत्यादि दाक्षिणः पुरुषमजानतः कामनया वैदिककर्मानुष्ठाननिबंधनो
यथा पुरुषज्ञानहीनानां स्वर्गाद्यर्थं इह कुर्वतां तानि तानीह कर्माणि तेषां बंधस्तु दाक्षिण इति दाक्षिण इति संज्ञा तु दक्षिणासंबंधनिबंधना बोध्येति संक्षेपः । ४४ । तमेव विदित्वाति मृत्युमेति नान्यः पंथा विद्यतेऽयना
येति श्रुत्या पुरुषज्ञस्यैव मोक्षकथनेनान्यस्य मोक्षाभावकथनाद् ज्ञानरहितस्य विरक्तस्यापि न मोक्ष इत्याशयवानाह वैराग्यादिति दृष्टानुश्रविकविषयेषु संबुद्धिविशेषरूपाद् वैराग्यात् केवलात् प्रकृतिलयः प्रकृ
तिपदेन महदहंकारतन्मात्राण्यपि गृह्यंते तेषु आत्मबुद्ध्योपास्यमानेषु लयो भवतीत्यर्थः राजसाद्रागात् कामाद्यर्थं रागात् कामक्रोधादेः संसारो भवति तत्र योगादिशौचरागः स्वर्गादिः आदि गोचरादि हृलोक भोग इति विवेकः ऐश्वर्या
दणिमादिलक्षणात् अविघातो गतिप्रतिबंधाभावः विपर्ययादनैश्वर्यात् तद्विपर्यासः सर्वत्र गतिविघातः यथा कस्यचिद्धनीश्वरस्य परगृहे प्रतिघातः । ४५ । ननु विपर्ययाद्याः सोऽस्य ज्ञेयः क्रमेणैव तेषां तत्तदंतर
णिकतिविधाः तत्राह एष इति विपर्ययश्चाशक्तिश्च तुष्टिश्च सिद्धिश्च आख्या नाम यस्य एष गणः प्रत्ययो बुद्धिस्तस्याः सर्गः सृष्टिः अन्यः तथा च बुद्धितले प्रविष्टेन तत्तदंतरकार्यकारणभेदात्तस्य भेदाः पंचाशद् दृश्यंते ननु कथं

सांसिद्धिकाश्च भावाः प्राकृतिका वैकृतिकाश्च धर्माद्याः दृष्टाः करणाश्रयिणः कार्याश्रयिणश्च कललाद्याः ४३ धर्मेण गमनमूर्ध्वं गमनमधस्ताद्भवत्यधर्मेण
ज्ञानेन चापवर्गो विपर्ययादिष्यते बंधः ४४ वैराग्यात्प्रकृतिलयः संसारो भवति राजसाद्रागात् ऐश्वर्यादविघातो विपर्ययात्तद्विपर्यासः ४५ एष प्रत्ययसर्गो विपर्य
याशक्तितुष्टिसिद्ध्याख्यः गुणवैषम्यविमर्दात्तस्य भेदास्तु पंचाशत् ४६ पंच विपर्ययभेदा भवंत्यशक्तिश्च करणवैकल्यात् अष्टाविंशतिभेदास्तुष्टिर्नवधाष्टधा सिद्धिः ४७ भेदस्तमसोऽष्टवि
धो मोहस्य च दशविधो महामोहः तामिस्रोऽष्टादशधा तथा भवत्यंधतामिस्रः ४८ एका

मेककारणादेतानि कार्याणि तत्राह गुणवैषम्यविमर्दादिति गुणानां वैषम्यं न्यूनाधिकबलतामंदमध्याधिकभावेन
नानाविधत्वं तया विमर्दो गुणानां गुणयोर्वा अभिभवस्तस्मादित्यर्थः न त्वेवं कार्यकारणयोरभेदेन विपर्ययस्याज्ञाने अज्ञानेऽधर्मे तुष्टे धर्मे सिद्धे ज्ञाने विवेक ... अज्ञानादयस्तु बुद्धेरेवातो विपर्ययादयोऽपीति न तत्तदंतरभेदा
स्तां विस्तरः । ४६ । पंचाशदिति सामान्यतउक्तं तत्र कस्य कति विधा भेदास्तत्राह पंच विपर्यय इति विपर्ययः संसारबीजं क्लेशः पंचमविधा ... स्मितारागद्वेषाभिनिवेशास्तेषामेव यथासंख्यं तमो मोहो महामोहस्ता
मिस्रांधतामिस्रसंज्ञाः अस्मिनि वैराग्यभयं न तु रोगादिकृता नाम रुक्मिणीरोगसमसंख्यतया कथमष्टाविंशतिधाशक्तिस्तत्राह करणवैकल्यादिति करणानां बुद्धितत्त्वे कादशेन्द्रियाणामपद्वैकल्ये च धस्तस्माद्याऽशक्तिः साष्टाविंशति
धेत्यर्थः शेषं सुगमं । ४७ । पंचानां विपर्ययाणामवांतरभेदमाह भेद इति तमसः इति अष्टसु प्रकृतिमहदहंकारपंचतन्मात्रेषु आत्मबुद्धिरविद्या तस्या एव तमइति संज्ञा तस्या अष्टविधविषयकत्वादष्टविधत्वं अणिमाद्यैश्वर्यप्राप
सिद्धेरहमस्मीत्यात्मन्यहंभावेनाभिमानविशेषोऽस्मिता अणिमाद्यष्टैश्वर्यविषयकत्वात्तस्या अष्टविधत्वं सैव च मोह संज्ञिका मोहस्य चैवंकारादष्टविधस्त्यन्वेति रागः कादिषु पंचविषयेषु दिव्यादिव्यतया दशविधे
ष्वादिप्वतत्वबुद्ध्या रागः स एव महामोहः विषयस्य दशविधत्वात्तस्य दशविधत्वं परेणोपभुज्यमानेषु दशसु शब्दादिविषयेषु पूर्वोक्ताणिमादिषु अष्टसु द्वेषस्तामिस्रसंज्ञः अष्टादशधा विषयत्वादस्याष्टादशधा विध
त्वं अभिनिवेशस्त्रासः अंधतामिस्राख्यः शब्दादिदशाणिमाद्यैश्वर्यं चाष्टविधं केषांचिद्विघ्यंति विनाशं भयाद् दशमाविषयत्वादस्याष्टादशधा विधं तदेवं विपर्यय ... रिति । ४८ । अस्माकं करणवैकल्यादशक्तिरष्टाविंशतिभेदानाह एके
कादशेति एकादशेन्द्रियाणां श्रोत्रत्वगक्षिरसनघ्राणवाक्पाणिपादपायूपस्थमनसां ... धतं जडता ... तताः एतदेव कास्त्ववापा

© Dharmartha Trust J&K. Digitized by eGangotri

तुष्टेर्नवभेदानाह आध्यात्मिकाश्चेति। प्रकृत्यादिभिन्नत्वेनात्मसाक्षात्कारो मोक्षोपायः परन्तु स तु साक्षात्कारः प्रकृतेः परिणामविशेषः प्रकृतिनित एव भविष्यति। ... ध्यानेन किञ्चिदे
व चिन्तयति न प्रकृतिमात्रात्स भवति तथा सति गृहस्थस्यापि संभवेन्न किन्तु संन्यासात् अप्योपादानात्स भविष्यतीत्यालस्यादिनानुष्ठानि ष्ठति तत्सोपा ... पारख्या अपारमा तुष्टिरिति
गीयते प्रव्रज्यापि कालविशेषं प्राप्य तं तं करिष्यतीत्यतः कालस्यैव प्राधान्यात् ज्ञानप्राप्तिकाले ज्ञानं भविष्यत्येवेत्यलं प्रयासेनेति तुष्टिः कालाख्या ओघ इत्युच्यते कालविशेषेऽपि सः भाग्यबलादेव भव
ति अतो भाग्यमेव हेतुर्नान्यदित्यलं प्रयासेनेति तुष्टिर्भाग्याख्या वृष्टिरित्युच्यते एताश्चतस्र आध्यात्मिकाः विषयोपरमो वैराग्यं तेन तुष्टयः पञ्च बाह्याः प्रकृत्यादिभिन्नत्वेनात्मज्ञानाभावात् तु
था हि अर्जनरक्षणक्षयभोगहिंसासु दोषदर्शनात् पञ्चोपरमा भवन्ति तद्धेतुकत्वात्तुष्टयोऽपि पञ्च भवन्ति यथा अर्जनोपायाः भिक्षाटनादयः क्लेशदा अतोऽलं प्रयासेनेति या तुष्टिः सा पार उच्यते
तथा कथंचिदर्जितस्य चोरादितो रक्षणमपि कष्टमित्यलं हित्वा या तुष्टिः सा सुपाराख्या एवं कथंचिद्रक्षितमपि भोगात् क्षयं गमिष्यत्येवेति कृत्वा या तुष्टिः सा पारापारमुच्यते एवं शब्दादिभो
गाभ्यासात्प्रवर्द्धन्ते कामास्ते च पुनः विषयप्राप्तावप्राप्तौ च कामिनं दुन्वन्तीति कृत्वा या तुष्टिः सा अनुत्तमाम्भ इत्युच्यते एवं भोगेऽवश्यं प्राणिहिंसा जायत एवेति दोषदर्शनाद्विषयोपरमे या तुष्टिः सा उत्तमाम्भ इत्युच्यते
तदेवमाध्यात्मिकाभिश्चतसृभिर्बाह्याभिः पञ्चभिर्नव तुष्टयोऽभिमताः अंभः सलिलमोघो वृष्टिः पारं तथा सुपारं अन्यच्च पारापारं अनुत्तमाम्भ उत्तमाम्भश्चेति ५०। अष्टसिद्धीराह ऊह इति ऊहो विचारः सामर्थ्याविरो
धतर्कणमिति यावत् शब्दः क्रियाकारकभावापन्नपदसमूहः पदव्युत्पत्तिः अध्ययनं गुरुमुखतः शास्त्रार्थज्ञानं दुःखविघाताः दुःखशमनोपायाः त्रय इति दुःखानां त्रित्वात् शमनोपायानामपि त्रित्वं सुहृत्प्राप्तिः आ
ध्यात्मिकजनसंगः दानं दैप् शोधन इति धातोर्बाह्याभ्यन्तरशौचं सिध्यत्यनयेति सिद्धिः तत्र दुःखविघातसिद्धिः फलत्वान्मुख्या अन्यास्तु तत्साधनत्वाद्गौण्य इति विवेकः तत्रोहादेः संज्ञाविशेष आकरे यथा तार तार

आध्यात्मिकाश्चतस्रः प्रकृत्युपादानकालभाग्याख्याः बाह्या विषयोपरमात् पञ्च नव तुष्टयोऽभिहिताः ५० ऊहः शब्दोऽध्ययनं दुःखविघातास्त्रयः सुहृत्प्राप्तिः दानं च सिद्धयोऽष्टौ
सिद्धेः पूर्वोऽङ्कुशस्त्रिविधः ५१ न विना भावैर्लिङ्गं न विना लिङ्गेन भावनिर्वृत्तिः लिङ्गाख्यो भावाख्यस्तस्माद्द्विविधः प्रवर्तते सर्गः ५२ अष्टविकल्पो दैवस्तैर्यग्योनिश्च पञ्चधा भवति मा
नुष्यश्चैकविधः समासतो भौतिकः सर्गः ५३ ऊर्ध्वं सत्त्ववि[redacted]शालस्तमोविशालश्च मूलतः सर्गः मध्ये रजोविशालो ब्रह्मादिस्तम्बपर्यन्तः ५४ तत्र जरामरणकृतं दुःखं प्राप्नो

सुतारं तारयन्तं प्रमोदं मुदितं मोदमानं रम्यकं सदाप्रमुदितं चेत्याः सिद्धय इति। आसामुपादेयत्वं विपर्ययाशक्तितुष्टीनां हेयत्वं ज्ञापयिष्यन्नाह सिद्धेः पूर्वोऽङ्कुशस्त्रिविध इति पूर्वः पूर्वोक्तो विपर्ययाशक्तितुष्टिरूपस्त्रिविधः सिद्धेरङ्कुशः कारणं विघ्न
रूपाद्विघ्नस्तन्निवारकं अतः सिद्धिपरिपन्थित्वादङ्कुश इवेति त्रिविधोऽप्ययं हेय एवेति भावः ५१ ननु भोगो विषयमन्तरेण न भवतीत्याकाशादिसर्ग एवास्तु किं तेन महदाद्यन्तीन्द्रियसर्गेणेत्यत आह न विना भावैरिति भावैः प्रत्य
क्षो विषयैर्विना लिङ्गं महदाद्यन्तीन्द्रियवृन्दं न भोगसाधनमित्यर्थः लिङ्गेन महदादिना विना भावानां विषयाणां न निर्वृत्तिः न भोगसाधनत्वं अयमभिप्रायः न हि विषयः स्वरूपतो भोगहेतुः सर्वेषां सर्वविषयभोगापत्तेरपि
तु ज्ञातस्तच्चेन्द्रियान्तःकरणैर्विना न तु सम्यक् स्वीकारः तस्माद्द्वयोरप्यावश्यकत्वात् लिङ्गाख्यः लिङ्ग्यत एव न तु साक्षात्क्रियत इति लिङ्गं महदाद्यन्तीन्द्रियवर्गः भावाख्यः भूयते प्राप्यतेऽर्थादिन्द्रियैरिति विषयव
र्गः प्रत्यक्षसिद्धः ५२। भौतिकसर्गविभागमाह अष्टविकल्प इति ब्राह्मप्राजापत्यैन्द्रपित्र्यगान्धर्वयक्षराक्षसपैशाचभेदादष्टविधो दैव इत्यर्थः तैर्यग्योन इति पशुपक्षिसर्पकीटस्थावरभेदात्पञ्चविध इत्यर्थः मानुष्य
श्चैकविधः समासतो ब्राह्मणत्वाद्यवान्तरजातिभेदाविवक्षयेति भौतिको देहिकस्तेन घटादिनिरासः केचित्तु घटादेः स्थावरेऽन्तर्भावं वदन्ति ५३ भौतिकस्य विशेषमाह ऊर्ध्वमिति भूर्लोकादूर्ध्वं सत्त्वविशालः सत्त्वबहुलस्तत्र चैव
पुनरजस्तमसोः सत्त्वेपि सत्त्वाधिक्यश्रवणात् मूलतः अधः पतनशील सोऽयं योनः तमोविशालस्तमोबहुलस्तेषु सत्त्वरजसोः सत्त्वेपि तमस आधिक्योपलब्धेः मध्ये भूर्लोके रजोविशालो रजोबहुलः सत्त्वतमसोः सत्त्वेपि
धर्माधर्मप्रवृत्तिपरत्वदर्शनेन रजस आधिक्यकल्पनात् ब्रह्मादीति सोऽयं ब्रह्मादिस्तम्बपर्यन्तः सर्गो लोकभेदेन त्रैधा स्थितिक इत्यर्थः स्तम्बः स्थावरः ५४। तदेवं सर्गं दर्शयित्वा तस्यापवर्गसाधनं वैराग्योपयोगिनीं दुःखतामा
ह तत्रेति जरामरणेति त्यत्तः पुरुषः स्वयं चेतनोऽपि तत्र लोके त्रयात्मके सर्गे जरामरणकृतं दुःखमाप्नोति न सर्वाद् दुःखं स्वभावेन स्वत एव सर्गो दुःखरूपो विवेकिनामिति निर्देशः यथाहुर्भगवान्पतञ्जलिः परिणामतापसंस्कार
दुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिन इति अत्र परिणामपदेन जरादिदुःखं बोध्यं तापपदेन मानसं वृत्तिभ्यासामिति मनस्तत्र्यासदुःखं बोध्यं संस्कारपदेन पुनर्जननादिदुःखं बोध्यं कियन्तं कालं दुःखं प्रा ६

© Dharmartha Trust J&K. Digitized by eGangotri